Total No. of Questions :7 ] [ Total No. of Printed Pages : 2

**Code No. : B.F.VD.R-01**

# स्नातकपरीक्षाः—२०१६

## बि.ए.१ – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्– ऋग्वेदः

### भागः - २, पत्रिका -३

### विषयः - व्यालिशिक्षा

**दिनाङ्कः** - 03-04-2016 ] [ **गरिष्ठाङ्कः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M.] [ Max. Marks : 100

---

**I. एकेन वाक्येन उत्तरं लिखत** **10 x 02=20**

१. व्यालिशिक्षाग्रन्थकर्ता कः ?

२. जटायां क्रमाः कति विधाः कथिताः ?

३. संहितापाठतः पुण्यं द्विगुणं कस्य पाठतः ?

४. ओदन्तसम्बोधनानां विलोमे प्रगृह्य अस्ति वा न वा ?

५. पञ्चक्रमस्य उदाहरणं मन्त्रः कः ?

६. 'मोषुणः' त्रिक्रमो चतुष्क्रमं वा ?

७. कः आचार्यसम्पदं गच्छेत् ?

८. क्रमपाठेन त्रिगुणं फलं चेत् जटापाठेन कियत् फलं भवेत् ?

९. जटायां क्रमयोः कस्य ग्रन्थस्य लक्षणं स्वीकर्तव्यम् ?

१०. त्र्यक्षरात्मका इकारान्ता इवान्ताः शब्दा विलोमे प्रगृह्यका न वा ?

**II. पञ्च श्लोकान् व्याख्यात** **05x06=30**

१. जटायां क्रमयोः प्रातिशाख्यलक्षणलक्ष्यता ।
व्युत्क्रमे सा मता नैव तत्र व्याकरणं मतम् ।।

२. ईदूदेदोदन्तशब्दा इत्यन्तास्त्र्यक्षरा अपि ।
प्रगृह्या एव जायन्ते संहितासन्ध्यभाविनः ।।

३. यत्राकरोऽवगृह्यत्वे दृश्यते व्युत्क्रमे तु सः ।
इकारेणैक्यमापन्नस्तत्रैव पररूपवान् ।।

४. आद्यपादद्वयं शुद्धं उत्तरं तु पदत्रयम् ।
अधिकं वाऽथ सर्वं वा समयोऽर्धर्चे उच्यते ।।

–अनुवर्तते

५. क्रमाणां त्रिक्रमादीनां व्युत्क्रमे मध्यमं पदम् ।
अप्यनावर्तितं धर्मं पदस्य प्रतिपद्यते ।।

६. परेप्युकार ओकार आव औकारलोपिनः ।
वकारो लुप्यतेऽन्यस्मिन् लुप्यते वा स्वरे परे ।।

**III. श्लोकानां तात्पर्यं लिखत** **04x 03=12**

१. जटा-माला- दण्ड-रेखा-रथ-ध्वज-शिखा-घनाः ।

२. संहितायां य ओकारः पद औकारतां व्रजेत् ।

३. ओदन्तानां निपातानां विलोमेऽस्ति प्रगृह्यता ।

४. उकार ओकारभावङ्गतोऽपि स्यात् प्रगृह्यकः ।

**IV.** संहितापदक्रमादिपारायणफलं रूपयत । **08**

**V.** रुद्रसूक्तमन्त्रान् लिखत । **10**

**VI.** पञ्चमन्त्राणां पदपाठं लिखत । **10**

**VII.** पञ्चमन्त्राणां क्रमपाठं लिखत । **10**

—०—

Total No. of Questions :4 ] [ Total No. of Printed Pages : 2

**Code No. : B.F.VD.L-06**

# स्नातकपरीक्षाः–२०१६

## बि.ए.१ – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्– वेदः

### भागः - १, पत्रिका -२

### विषयः -वैदिकसाहित्यचरितम् –१

**दिनाङ्कः** - 02 -04-2016 ] [ **गरिष्ठाङ्कः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. अधोनिर्दिष्टेषु पञ्चानामुत्तरं लिखत** **05x10=50**

१. ऋग्वेदे देवतानां नानात्वम् एकत्वं च कथं निर्णीयते ?

२. ऋग्वेदस्य ऋषिच्छन्दोदैवतानि अधिकृत्य यथामति लिखत ।

३. इन्द्रदेवतामन्त्रं विलिख्य इन्द्रस्य प्रभावं वर्णयत ।

४. सामशाखाया विभागं क्रमं शाखानामानि च लिखत ।

५. पृथ्वीस्थानदेवतासु अग्नेः वैशिष्ट्यं निरूपयत ।

६. सूर्यसूक्तमन्त्रान् विलिख्य सूर्यप्रभावं वर्णयत ।

७. द्वित्रान् सामवेदमन्त्रान् विलिख्य सामगानपद्धतिं निरूपयत ।

**II. चतुर्णां लघूत्तराणि लिखत** **05x05=20**

१. सवितारं संवर्ण्य गायत्रीमन्त्रार्थं लिखत ।

२. सामविकाराः के ? स्पष्टयत ।

३. सूर्या(विवाह)सूक्तस्य वैशिष्ट्यं वर्णयत ।

४. रुद्रमन्त्रान् रुद्रदेवतावर्णनं च लिखत ।

५. वेदाध्ययनस्य प्रयोजनं किम् ? लिखत ।

६. नदीसूक्तानां वर्णनं नदीप्रभावं च निरूपयत ।

–अनुवर्तते

**III. एकेन वाक्येन उत्तरं लिखत (पञ्चानामेव)** **05x 02=10**

१. ऋग्वेदस्य आदिमो मन्त्रः कः ?

२. ऋग्वेदे कति मण्डलानि सन्ति ?

३. उद्गातृवेदः कः ?

४. सामवेदस्य चत्वारि गानानि कानि ?

५. ऋग्वेदे यमयमीसंवादः कस्मिन् मण्डले भवति ?

६. ऋग्वेदे गायत्र्यादीनि कति छन्दांसि प्रतिपादितानि ?

७. और्ध्वदैहिककर्मोक्तमन्त्राः कस्मिन् मण्डले सन्ति ?

**IV. चतुर्णां लघुटिप्पणीः रचयत** **04x05=20**

१. अग्निः

२. वरुणः

३. पुरुषसूक्तम्

४. पृथ्वी

५. रुद्रः

६. विष्णुः

—०—

Total No. of Questions :5 ] [ Total No. of Printed Pages : 2

**Code No. : B.F.VD.S.Y-05**

# स्नातकपरीक्षाः—२०१६

## बि.ए.१ – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्—शुक्लयजुर्वेदः

### भागः - २, पत्रिका -३

### विषयः - याज्ञवल्क्यशिक्षा

**दिनाङ्कः** - 03-04-2016 ] [ **गरिष्ठाङ्कः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. पञ्चप्रश्नानां उत्तराणि लिखत** **05x05=25**

१. उदात्तादिस्वराणां वर्ण,दैवत-छन्दांसि गोत्राणि विशदयत ।

२. षड्जादीनां स्वराणां उच्चारणप्रकारान् प्रदर्शयत ।

३. मात्राकालान् निरूपयत ।

४. मात्रावसाने विशेषः कः ?

५. वर्णोच्चारणे कः समर्थः ? विवृणुत ।

**II. उत्तरं लिखत** **05x05=25**

१. अध्यापनविधिं निरूपयत ।

२. संहितादिपाठधारणे किं फलम् ?

३. पदोच्चारणे को विशेषः ?

४. अध्ययनफलम् किम् ?

५. हस्तचालनविधिं निरूपयत ?

**III. इमानि पूरयत** **05x05=25**

१. उच्चस्थानगते..............तदा भवेत ।

२. उदात्तान्निहत................प्रथमः सदा ।

३. माध्यन्दिन................अनुदात्तकौ ।

४. अष्टौ......................तथाऽपरः ।

५. उत्थाने तु...........प्रयोजयेत् ।

–अनुवर्तते

**IV. टिप्पणीं कुरुत** **05x03=15**

१. अभिनिहितः

२. क्षैप्रः

३. तैरोविरामः

४. तैरोव्यञ्जनः

५. त्रैत्स्वर्यम्

**V. विवृणुत** **05x02=10**

१. अवग्रहः

२. ऊष्मः

Total No. of Questions :5 ] [ Total No. of Printed Pages : 2

**Code No. : B.F.VD.V-21**

# स्नातकपरीक्षाः–२०१६

## बि.ए.१ – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्–वीरशैवदः

### भागः - २, पत्रिका -३

## विषयः - पाणिनीयशिक्षा

**दिनाङ्कः** - 03 -04-2016 ] [ **गरिष्ठाङ्कः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. एकेन वाक्येन उत्तरं लिखत** **10 x 02=20**

१. प्राकृते संस्कृते च स्वयंम्भुवा कतिवर्णाः प्रोक्ताः ?

२. स वाग्वज्रो कं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ?

३. हस्तचालनेन विना योऽधीते स कां योनिमधिगच्छति ?

४. दाक्षीपुत्रः कः ?

५. अन्तःस्था वर्णाः के ?

६. शूर्दूलरुतोपमेन उरःस्थितेन स्वरेण कस्मिन् काले पठेत् ?

७. पाठका गुणाः के ?

८. सम्यग्वर्णप्रयोगेन कुत्र पूज्यते ?

९. सौराष्ट्रिकानारीप्रोक्त-तक्रशब्दवत् के वर्णाः प्रयोक्तव्याः ?

१०. ए,ऐ,ओ,औ, वर्णाः कुत्र उत्पद्यन्ते ?

**II. ससन्दर्भं व्याख्यात (पञ्चानामेव)** **05x06=30**

१. मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम् ।
प्रातःसवनयोग्यं तं छन्दो गायत्रमाश्रितम् ।।

२. जिह्वामूले तु कुः प्रोक्तो दन्तोष्ठ्यो वः स्मृतो बुधैः ।
एऐ तु कण्ठतालव्या ओऔ कण्ठोष्ठजौ स्मृतौ ।।

३. एवं वर्णाः प्रयोक्तव्याःनाव्यक्ता न च पीडिताः ।
सम्यग् वर्णप्रयोगेण ब्रह्मलोके महीयते ।

–अनुवर्तते

४. मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात् ।।

५. शङ्करः शाङ्करीं प्रादाद्दाक्षीपुत्राय धीमते ।
वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः ।।

६. अवक्षरमनायुष्यं विस्वरं व्याधिपीडितम् ।
अक्षता शस्त्ररूपेण वज्रं पतति मस्तके ।।

**III. पञ्चानां श्लोकानां तात्पर्यं लिखत** **05x06=30**

१. व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत् ।
भीता पतनभेदाभ्यां तद्वद् वर्णान् प्रयोजयेत् ।।

२. गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः ।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ।।

३. माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ।
धैर्यं लयसमर्थं च षडेते पाठकागुणाः ।।

४. चाषस्तु वदते मात्रां द्विमात्रं चैव वायसः ।
शिखी रौति त्रिमात्रं तु नकुलस्त्वर्धमात्रकम् ।।

५. येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ।।

६. अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः ।।

**IV.** संस्कृतभाषायां स्वरादयः कति सङ्ख्याका इति ग्रन्थोक्तदिशा व्याख्यात । **10**

**V.** पाणिनीयशिक्षाग्रन्थस्य उपस्कारकत्वं प्रतिपादयत । **10**

—०—

Total No. of Questions :5 ] [ Total No. of Printed Pages : 2

**Code No. : B.F.VD.A-17**

# स्नातकपरीक्षाः–२०१६

## बि.ए.१ – विद्वन्मध्यमा - प्रथमवर्षः

## शास्त्रम्–अथर्ववेदः

### भागः -२ , पत्रिका -३

### विषयः - निरुक्तम् (पूर्वार्धे१-२ अध्याये प्रश्नाः)

**दिनाङ्कः** - 03-04-2016 ] [ **गरिष्ठाङ्कः - १००**

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. अधोनिर्दिष्टमन्त्रत्रयस्यैव निरुक्तदिशा अर्थं विवृणुत** **03x 20=60**

१. यद्देवापिः शन्तनवे पुरोहितो होत्रायं वृतः कृपयन्नदीध्येत् ।
देवश्रुतं वृष्टिवनिं रराणो बृहस्पतिर्वाचमस्मा अयच्छत् ।

२. प्र स मित्र मर्तो अस्तु प्रयस्वान् यस्त आदित्य शिक्षति व्रतेन ।
न हन्यते न जीयते त्वोतो नैनमंहो अश्नोत्यन्तितो न दूरात् ।।

३. रमध्वं मे वचसे सोम्याय ऋतावरीरुपमुहूर्तमेवैः ।
प्र सिन्धुमच्छा बृहती मनीषा अवस्युरह्वे कुशिकस्य सूनुः ।।

४. उतस्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपि कक्ष आसनि ।
क्रतुं दधिक्रा अनु सन्तवीत्वत् पथामङ्कास्यन्वापनीफणत् ।।

**II. अधोनिर्दिष्टनिरुक्तखण्डद्वयं ग्रन्थदिशा विवृणुत** **02x10=20**

१. अयं स शब्दायते । येन गौरभिप्रवृत्ता । मिमाति मायुं शब्दं करोति । मायुमिवादित्यमिव वा । वागेषा माध्यमिका । ध्वसनेमेघे अधिश्रिता । सा चित्तिभिर्निहि चकार मर्त्यं विद्युद् भवन्ती प्रत्यूहते वव्रिम् । वव्रिरिति रूपनाम । वृणोतीति सतः । वर्षेव प्रच्छाद्य पृथिवीं तत्पुनरादत्ते ।।

२. देवानां निर्माणे प्रथमा अतिष्ठन् माध्यमिका देवगणाः । प्रथम इति मुखनाम प्रतमो भवति । विकर्तनेन मेघानामुदकं जायते । त्रयस्तपन्ति पृथिवीमनूपाः । पर्जन्यो वायुरादित्यः शीतौषधिवर्षैरोषधीः पाचयन्ति । अनूपा अनुवपन्ति लोकन्स्वेन कर्मणा ।।

३. आशृणवाम ते कारो ! वचनानि । याहि दूरादनसा च रथेन च । विनमाम ते पाययमानेव योषा पुत्रं मर्ययेव कन्या परिष्वजनाय निनमा इति वा ।।

–अनुवर्तते

**III.** **एषु पञ्चैव मन्त्रार्थान् निरुक्तदिशा विवृणुत** **05x02=10**

१. वृक्षस्य नु ते पुरुहूतवयाः ।

२. नेन्द्रं देवममंसत ।

३. तमिध्वर्न्धन्तु नो गिरः ।

४. अदितिर्द्यौरदितिन्तरिक्षम् ।

५. अवसाय पद्वते रुद्रमृळ ।

६. दूतो निर्ऋत्या इदमाजगाम ।

७. अग्निरिवमन्योत्विषितः सहस्व ।

८. मृगो न भीमः कुचरोगिरिष्ठाः ।

**IV.** नामाख्यातोपसर्गनिपातान् विवृणुत अथवा 'नूनम्' इति पदस्योदाहरणं विवृणुत । **05**

**V.** गृह्यशिष्यनिरूपणं विवृणुत अथवा 'योऽर्थज्ञः सकलं भद्रमश्नुत' इति वाक्यं विशदयत । **05**

—०—

Total No. of Questions :7 ] [ Total No. of Printed Pages : 2

**Code No. : B.S.VD.R-01**

# स्नातकपरीक्षाः—२०१६

## बि.ए.२ – विद्वन्मध्यमा - द्वितीयवर्षः

## शास्त्रम्—ऋग्वेदः

### भागः - २, पत्रिका -३

### विषयः - व्यालिशिक्षा

**दिनाङ्कः** - 03 -04-2016 ] [ **गरिष्ठाङ्कः** - १००

**समयः**- 02.30.P.M.to 5.30 P.M.] [ Max. Marks : 100

---

**I. एकेन वाक्येन उत्तरं लिखत** **10x 02=20**

१. विलोमजटायां कति स्वरिताः प्रवर्तन्ते ?

२. जात्यादिस्वरितानाम् उदात्ते स्वरिते वा परे किं स्यात् ?

३. चतुर्विधाः कम्पाः जटायां वाच्या न वा ?

४. विकृतयः कति ?

५. चतुर्विधाः कम्पाः के ?

६. ह्रस्वस्वरकम्पे ह्रस्वविधानम् । दीर्घस्वरकम्पे किम् ?

७. व्यालिशिक्षा-ग्रन्थप्रवर्तकः कः ?

८. पदोत्तरां जटामेव किमिति प्रचक्षते ?

९. पञ्चक्रमस्य उदाहरणमन्त्रः कः ?

१०. कः आचार्यसम्पदं गच्छेत् ?

**II. पञ्च श्लोकान् व्याख्यात** **05x 06=30**

१. आद्यान्ते एव संशुद्धे यत्र तत्र पदे इमे ।
समयस्यादिमान्त्याभ्यां संयोज्य कथयेज्जटाम् ।।

२. तिरोविरामोऽथ तैरोव्यञ्जनः पादवृत्तकः ।
जात्याऽभिनिहितः क्षैप्रः प्रश्लिष्ट इति ते स्मृताः ।।

३. उपसर्गेतरोदात्तप्रक्तैरोव्यञ्जनस्मृतः ।
स उक्तो व्युत्क्रमे हीळे पुरोहितमिति क्रमे ।।

४. जात्यः स्वरः स विज्ञेयोऽपूर्वो वा नीचपूर्वकः ।
यो वान्तो वा यकारान्त क्व यूथ्यस्तदुदाहृतिः ।।

–अनुवर्तते

५. अपूर्वो नीचपूर्वोच्च इश्च ह्रस्वो ह्रसीयसा ।
इनायुक् प्रश्लिष्टनामाऽभीदं वीदमुदाहृतिः ।।

६. चतुर्विधानां कम्पानां मध्ये यः कोऽपि वा भवेत् ।
कम्पो वा तदभावो वाऽनुक्रमे सङ्क्रमे समः ।।

**III. एतेषां तात्पर्यं लिखत** **04x03=12**

१. प्लुतिः श्रुता युत्क्रमेऽपि संहितायां पदक्रमे ।

२. तिरोविराम उच्चैरेकोपसर्गमुखो मतः ।

३. विवृत्तिस्वरितः पादवृत्तनामाभिधीयते ।

४. पदोत्तरां जटामेव शिखामार्याः प्रचक्षते ।

**IV.** घनस्वरूपं लिखत । **08**

**V.** अग्निसूक्तपदपाठं लिखत । **10**

**VI.** मन्त्रपञ्चकस्य क्रमपाठं लिखत । **10**

**VII.** मन्त्रद्वयस्य जटापाठं लिखत । **10**

—०—

Total No. of Questions :4 ] [ Total No. of Printed Pages : 2

**Code No. : B.S.VD. L-06**

# स्नातकपरीक्षाः—२०१६

## बि.ए.१ – विद्वन्मध्यमा - द्वितीयवर्षः

## शास्त्रम्—वेदः

### भागः - २, पत्रिका -२

### विषयः - वैदिकसाहित्यचरितम्

**दिनाङ्कः** - 02-04-2016 ] [ **गरिष्ठाङ्कः** - १००

**समयः**- 02.30.P.M.to 5.30 P.M.] [ Max. Marks : 100

---

**I. अथोनिर्दिष्टेषु पञ्चानाम् उत्तरं लिखत** **05x10=50**

१. सप्रभेदं यजुर्वेदसंहितायाः लक्षणं विवृणुत ।

२. तैत्तिरीयशाखामधिकृत्य प्रबन्धमेकं लिखत ।

३. अर्थवेदस्य विषयविवेचनं कुरुत ।

४. शुक्लयजुर्वेदमधिकृत्य प्रबन्धमेकं रचयत ।

५. अथर्ववेदस्य शाखाविभजनं क्रमं निरूपयत ।

६. अथर्ववेदोक्त-तत्त्वविचारान् सङ्गृह्णीत ।

७. मैत्रायणीयसंहितायामुक्तरीत्या काण्डविभागं दर्शयत ।

**II. चतुर्णां लघूत्तराणि लिखत** **04x 05=20**

१. कृष्णयजुर्वेदस्य काण्डर्षयः के ? तेषां नामानि लिखत ।

२. अथर्ववेदस्य आवश्यकता अस्ति वा न वेति विचारयत ।

३. ऋग्वेदस्य अथर्ववेदस्य च वैशिष्ट्यं लिखत ।

४. अथर्ववेदोक्तभैषज्यसूक्तं विवृणुत ।

५. अथर्ववेदः ब्रह्मवेदः इति विषये सायणाचार्यस्य अभिप्रायं स्पष्टयत ।

६. आभिचारसूक्तमहत्त्वं वर्णयत ।

**III. एकेन वाक्येन उत्तरं लिखत (पञ्चानामेव)** **05x02=10**

१. यजुर्वेदस्य कति शाखा उपलभ्यन्ते ?

२. शुक्लयजुर्वेदप्रवर्तकः कः ?

–अनुवर्तते

३. तैत्तिरीयशाखाया विद्वत्पूर्णं भाष्यं के विरचितवन्तः ?

४. कृष्णयजुर्वेदे कति काण्डानि सन्ति ?

५. सूर्योपासकाः के ?

६. ऐहिकफलं को वेदो ददाति ?

७. तैत्तिरीयशाखायाः प्रथमो मन्त्रः कः ?

## IV. चतुर्णां लघुटिप्पणीः रचयत **04x 05=20**

१. प्रायश्चित्तसूक्तानि ।

२. शौनकशाखा ।

३. रुद्राध्यायः ।

४. अथर्ववेदऋषयः ।

५. पौष्टिकसूक्तानि ।

६. काण्वशाखा ।

—०—

Total No. of Questions :6 ] [ Total No. of Printed Pages : 2

**Code No. : B.S.VDS.Y-08**

# स्नातकपरीक्षाः—२०१६

## बि.ए.२ – विद्वन्मध्यमा - द्वितीयवर्षः

## शास्त्रम्—शुक्लयजुर्वेदः

### भागः -२ , पत्रिका -३

## विषयः - याज्ञवल्क्यशिक्षा

**दिनाङ्कः** - 03-04-2016 ] [ **गरिष्ठाङ्कः** - १००

**समयः**- 02.30.P.M.to 5.30 P.M.] [ Max. Marks : 100

---

**I. इमानि विवृणुत** **05x03=15**

१. स्वराः

२. ऊष्माणः

३. मूर्धन्यः

४. वर्णः

५. दैवत-लिङ्गाः

**II. उत्तरत** **05x03=15**

१. पदगोत्राणि कानि ?

२. दैवतानि कानि ?

३. किं विवृत्तिस्वरूपम् ?

४. कति सन्धयः ?

५. स्वरभक्तयः कति ?

**III. उत्तरत** **05x 05=25**

१. वर्णोच्चारणविधिं विवृणुत ।

२. को नाम रङ्गः ? कति विधयः स्पष्टयत ।

३. किन्नाम पदाधिकारः ?

४. आम्रेडितम् नाम किम् ?

५. के सप्तविधपिण्डाः ?

–अनुवर्तते

**IV. इमानि पूरयत** **05x 05=25**

१. न भोजनविलम्बी...............गरुडहंसवत् ।

२. पञ्चविद्यां न ..................विस्मृतं मनः ।

३. सुखार्थी.........................कुतः सुखम् ।

४. यथा पिपीलिका........................कारणम् ।

५. शतेन गुणिता...........................च तिष्ठति ।

**V. अध्येतृधर्माः के ?** **10**

**VI. टिप्पणीमारचयत** **05x 02=10**

१. घोषाः

२. स्पर्शाः

३. वज्रिणः

४. यमाः

५. रेफः

—०—

Total No. of Questions : 5 ] [ Total No. of Printed Pages : 2

**Code No. : B.S.VD.A-17**

# स्नातकपरीक्षाः—२०१६

## बि.ए.२ – विद्वन्मध्यमा - द्वितीयवर्षः

## शास्त्रम्—वेदः

**भागः -२ , पत्रिका -३**

**विषयः - निरुक्तम् (पूर्वार्धे-३-४अध्यायौ)**

**दिनाङ्कः** - 03 -04-2016 ] [ **गरिष्ठाङ्कः - १००**

**समयः**- 02.30.P.M.to 5.30 P.M.] [ Max. Marks : 100

---

**I. अधोनिर्दिष्टमन्त्रत्रयस्यैव निरुक्तदिशा व्याख्या विधेया** **03x 20=60**

१. वयः सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः ।
अपध्वान्तमूर्णुहि पूर्धि चक्षुमुमुग्ध्यस्मान् निधयेव बद्धान् ।।

२. प्रियमेधवदत्रिवत् जातवेदो विरूपवत् ।
अङ्गिरस्वन्महि व्रतप्रस्कण्वस्य श्रुधीहवम् ।।

३. अभी ३ मेकमेको अस्मि निष्षाळभीद्वा किमुत्रयः करन्ति ।
खलेन पर्षान्प्रति हन्मि भूरि किं मानिन्दन्ति शत्रवो अनिन्द्राः ।।

४. दशावनिभ्यो दशकक्ष्येभ्यो दशयोक्त्रेभ्यो दशयोजनेभ्यः ।
दशभीषुभ्यो अर्चताजरेभ्यो दशधुरो दश युक्ता वहद्भ्यः ।।

**II. अधोनिर्दिष्टनिरुक्तखण्डद्वयस्यैव ग्रन्थदिशा व्याख्या विधाया** **02x10=20**

१. कायमानश्चायमानः कामयमान इति वा । वनानि त्वं यन्मातृरपोऽगम । उपशाम्यन् । न तत्ते अग्ने प्रमृष्यते निवर्तनं दरेयत् रुसन्निह भवसि जायमानः ।।

२. सप्त युञ्जन्ति रथमेकचक्रमेकचारिणं, चक्रं चकतेर्वा चरते क्रमतेर्वा । एको अश्वो वहति सप्त नामा । सप्तास्मै रश्मयो रत्यनाभिसन्नामयन्ति सप्तैनमृषयः स्तुवन्ति वेदमपीतर-न्नामैतस्मादेवाभिसन्नामात् ।

३. हरः हरतेः । ज्योतिर्हर उच्यते । उदकं हर उच्यते । लोका हरांस्युच्यन्ते अत्पृगहनी ?? उच्येते । 'प्रत्यग्ने हर सा हरः शृणीहि विश्वतः प्रति' ।। इत्यपि निगमो भवति ।

–अनुवर्तते

**III.** **यथेष्टं अधोनिर्दिष्टमन्त्रांशान् निरुक्तदिशा विशदयत (चतुर एव)** **04x2.5=10**

१.शिशीते शृङ्गे रक्षसे विनिक्षे ।

२. नूच पुरा च सदनं रयीणाम् ।

३. अद्या चिन्नू चित्तदपो नदीनाम् ।

४. पदं देवस्य नामसाव्यन्तः ।

५. रजांसि चित्रा विचरन्ति तायवः ।

६. गोभिः क्राणा अनूषत ।

**IV.** **अधोनिर्दिष्टेषु पदेषु पञ्चैव निरुक्तदिशा विवृणुत सङ्क्षेपेण** **05x01=05**

१. हसाः

२. दारु

३. अकूपाटः

४. नोधा

५. प्रियमेधः

६. शंयुः

७. दमूना

८. च्यवनः

**V.** एकार्थमनेकशब्दं विचिन्वन् सङ्क्षेपतो टिप्पणिर्देया

अथवा

'अपिति सर्वम्' इति सङ्क्षेपतः शास्त्रदिशा विवृणुत । **05**

—०—

Total No. of Questions :6 ]  [ Total No. of Printed Pages : 2

**Code No. : B.S.VD.V-21**

# स्नातकपरीक्षाः–२०१६

## बि.ए.२ – विद्वन्मध्यमा - द्वितीयवर्षः

## शास्त्रम्–वीरशैववेदः

### भागः - २, पत्रिका -३

## विषयः - ऋग्भाष्यभूमिका

**दिनाङ्कः** - 03 -04-2016 ]  [ **गरिष्ठाङ्कः - १००**

**समयः**- 02.30.P.M.to 5.30 P.M.]  [ Max. Marks : 100

---

**I. एकेन वाक्येन उत्तरं लिखत** **10x 02=20**

१. ऋग्वेदस्य भाष्यकारः कः ?

२. ऋग्वेदे कतिमण्डलानि सन्ति ?

३. सायणाचार्यं प्रति वेदभाष्यरचनार्थं कः अन्वशात् ?

४. सायणस्य अग्रजः कः ?

५. स्थाणुरयं भारहारः  किला भूदधीत्य वेद...इति केनोक्तम् ?

६. विश्वस्य जगतः प्रतिष्ठा कः ?

७. वेदाङ्गनि कानि ?

८. ग्रन्थकारः कस्य राज्ञः सभायां पण्डितः आसीत् ?

९. मङ्गपद्येन को देवः स्तूयते ?

१०. वीरशैवसम्प्रदायस्थानां को गुरुः ?

**II. ससन्दर्भं पञ्च श्लोकान् व्याख्यात** **05x 06=30**

१. यस्य निश्वसितं वेदा यो वेदेभ्याऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ।।

२. ये पूर्वोत्तरमीमांसे ते व्याख्यायति सङ्ग्हात् ।
कृपालुमाधवाचार्यो वेदार्थं वक्तुमुद्यतः ।।

३. एतस्मिन् प्रथमोऽध्यायः श्रोतव्यः सम्प्रदायतः ।
व्युत्पन्नस्तावता सर्वं बोद्धुं शक्नोति बुद्धिमान् ।।

–अनुवर्तते

४. एकं सद्विप्रा बहुधा वदन्ति अग्निं यमं मातरिश्वानमाहुः ।

४. तस्माद् ऋग्वेदस्य अभ्यर्हितस्य आदौ व्याख्यानमुचितम् ।

५. ननु वेद एव  तावन्नास्ति कुतः तदवान्तरविशेषः  ऋग्वेदः ?

**III. एतेषां तात्पर्यं लिखत (चतुर्णामेव)** **04x05=20**

१. अध्वर्यवस्य यज्ञेषु प्राधान्याद् व्याकृतः पुरा ।
यजुर्वेदोऽथ होत्रार्थमृग्वेदो व्याकरिष्यते ।।

२. तत्कटाक्षेण तद्रूपं दधद् बुक्कमहीपतिः ।
आदिशत् माधवाचार्यं वेदार्थस्य प्रकाशने ।।

३. ऋचः सामानि जज्ञिरे ।

४. एक एव रुद्रो न द्वितीयाय तस्थे । सहस्राणि सहस्रशो ये रुद्रा अधिभूम्याम् ।

५. वेदस्यापि परमेश्वरनिमित्तत्वात् पौरुषेयत्वम् ?

**IV.** पुरुषसूक्तं सस्वरं लिखत । **10**

**V.** उपदेशद्वारा एव वेदाध्ययनं कर्तव्यमिति ग्रन्थोक्तदिशा स्पष्टयत । **10**

**VI.** वेदाध्ययनस्य महत्त्वं प्रतिपादयत । **10**

—०—

Total No. of Questions :4 ] [ Total No. of Printed Pages : 2

**Code No. : MR(V)-02**

# स्नातकपरीक्षाः—२०१६

## बि.ए.३ – विद्वन्मध्यमा - तृतीयवर्षः

## वेदः-सामान्यभागः

### भागः - १, पत्रिका - २

## विषयः - वैदिकसाहित्यचरितम्-३

**दिनाङ्कः** - 31 -03-2016 ] [ **गरिष्ठाङ्कः** - १००

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. पञ्चानाम् उत्तरं लिखत** **05x 08=40**

१. ब्राह्मणानां कालं तदुक्तसामाजिकजीवनं च विवृणुत ।

२. तैत्तिरीयारण्यकस्य वैशिष्ट्यं वर्णयत ।

३. वेदाङ्गानां स्वरूपं विवृत्य तेषु व्याकरणस्य महत्त्वं स्पष्टयत ।

४. ताण्ड्यमाहाब्राह्मणस्य स्वरूपं महत्त्वं च निरूपयत ।

५. उपनिषदमधिकृत्य प्रबन्धमेकं रचयत ।

६. बृहदारण्यकोपनिषदः सारं सङ्गृह्णीत ।

७. ब्रह्मणः स्वरूपं जगतः स्वरूपं च वर्णयत ।

**II. चतुर्णां लघूत्तराणि लिखत** **04x05=20**

१. जीवात्मनः स्वरूपं वर्णयत ।

२. ऐतरेयारण्यकस्य महत्त्वं स्पष्टयत ।

३. गोपथब्राह्मणस्य सारं सङ्गृह्णीत ।

४. श्वेताश्वतरोपनिषदः स्वरूपं विवृणुत ।

५. शतपथब्राह्मणस्य महत्त्वं लिखत ।

६. कठोपनिषदि प्रतिपादितमात्मतत्त्वं वर्णयत ।

**III. एकेन वाक्येन उत्तरं लिखत** **10x02=20**

१. शतपथब्राह्मणः कस्य वेदस्य सम्बन्धी ?

२. 'नैषा तर्केण मतिरापनेया' इति कस्यामुपनिषदि उक्तम् ?

–अनुवर्तते

३. ओङ्कारस्वरूपं मुण्डके माण्डूक्ये वा कुत्र प्रतिपादितम् ?

४. वेदाङ्गानि कानि ?

५. उद्गीथो नाम कः ?

६. 'तत्त्वमसि' इति महावाक्यं कुत्र उपदिष्टम् ?

७. षडेते पाठकाधमाः । के ?

८. 'यदक्षरं परिमाणं तच्छब्दः' इति केन उक्तम् ?

९. ताण्ड्यमहाब्राह्मणः कस्य वेदसम्बन्धी ?

१०. पुष्पसूत्रं कस्मिन् प्रातिशाख्ये भवति ?

**IV. चतुर्णां लघुटिप्पणीः रचयत ।** **04x05=20**

१. गृह्यसूत्रम्

२. ईशावास्यम्

३. ज्योतिषम्

४. छान्दोग्यम्

५. मुण्डकोपनिषत्

६. याज्ञवल्क्यः

—०—

Total No. of Questions : 6 ] [ Total No. of Printed Pages : 2

**Code No. : MR(V)-01**

# स्नातकपरीक्षाः—२०१६

## बि.ए.३ – विद्वन्मध्यमा - तृतीयवर्षः

## वेदः-सामान्यभागः

### भागः - १, पत्रिका -१

## विषयः -वैदिकीप्रक्रिया

**दिनाङ्कः** - 29 -03-2016 ] [ **गरिष्ठाङ्कः** - १००

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**I. अधोनिर्दिष्टेषु पञ्च सूत्राणि व्याख्यात** **05x05=25**

१. रात्रेश्चाजसौ ।

२. छन्दसि ठञ् ।

३. छन्दसि वनसनरक्षिमथाम् ।

४. गुपे च्छन्दसि ।

५. अवयाः श्वेतवाः पुरोडाश्च ।

६. वेशान्तहिमवद्भ्यामण् ।

७. इतश्च लोपः परस्मैपदेषु ।

**II. पञ्च सूत्राणि व्याख्यात** **05x05=25**

१. दूतस्य भागकर्मणी ।

२. मधोर्ञ् च ।

३. सोमम‍र्हति यः ?

४. स उत्तमस्य ।

५. अग्राद्यत् ।

६. सहस्रेण सम्मतो घः ।

७. मन्त्रे वृषेषपयमनविदभूवीरा उदात्तः ।

**III. चतुर्णां सूत्राणामभिप्रायं सोदाहरणं लिखत** **04x05=20**

१. हेमन्ताच्च ।

२. सर्वदेवतात्तिल् ।

–अनुवर्तते

३. कद्रुकमण्डल्वोच्छन्दसि ।

४. मायायामण् ।

५. भवेः छन्दसि ।

६. बर्हिषि दत्तम् ।

**IV.** गणपतिसूक्तं सस्वरं लिखत । **10**

**V.** विष्णुसूक्तमन्त्रान् लिखत । **10**

**VI.** रुद्रसूक्तमन्त्रान् लिखत । **10**

Total No. of Questions : 5 ] [ Total No. of Printed Pages : 1

**Code No. : B.F.V.D.KY-09**

# स्नातकपरीक्षाः–२०१६

## बि.ए.१ – विद्वन्मध्यमा - प्रथमयवर्षः

## शास्त्रम्–कृष्णयजुर्वेदः-क्रमान्तम्

### भागः - २, पत्रिका -३

## विषयः -तैत्तिरीयप्रातिशाख्यम्-वैदिकाभ्यासाव्याख्योपेतम्

**दिनाङ्कः** - 03-04-2016 ] [ **गरिष्ठाङ्कः** - १००

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 100

---

**सूचना-सर्वे प्रश्नाः समाधेयाः**

**I. सूत्राणि व्याख्यात** **05x12=40**

१. यथायुक्ताद्विधिः सा प्रकृतिः ।

२. उपबन्धस्तु ङेशाय नित्यम् ।

३. राये स इन्द्रः पूर्वश्चाकारपरे ।

४. अनितिपरो ग्रहोख्य याज्यापृष्ठ्यहिरण्यवर्णीयेष्वीकारोकारपूर्वो रेफमाकारपूर्वस्तु यकारम् ।

५. पत्नीवेपतीपतेपतयेपतिएवतिम्परः ।

**II.** सप्तवाचःस्थानानि यथासूत्रं व्याख्यात **10**

**III.** स्वरभक्तिसूत्रं यथाभाष्यं व्याख्यात **10**

**IV. सूत्राणि पूरयत** **06x05=30**

१. धातारातिं..........।

२. तऱ्हा॑स्तस्मिन्........।

३. रासस्सयप्तेऽग्निः.........।

४. अमी चक्षुषी...........।

५. शक्ती रथी त्विषी.....।

६. गमयतो भवतो.........।

**V. पदार्थं विवृणुत** **05x02=10**

१. तैरोव्यञ्जनः

२. अभिनिधानः

३. विक्रमः

४. अर्धतृतीयमात्राम्

५. प्रचयः

—०—

Total No. of Questions : 5 ] [ Total No. of Printed Pages : 1

**Code No. : B.S.V.D.KY-09**

# स्नातकपरीक्षाः–२०१६

## बि.ए.२ – विद्वन्मध्यमा - द्वितीयवर्षः

## शास्त्रम्–कृष्णयजुर्वेदः

### भागः - २, पत्रिका -३

### विषयः -व्यासशिक्षा-वेदतैजसव्याख्योपेतम्

**दिनाङ्कः** - 03-04-2016 ] [ **गरिष्ठाङ्कः - १००**

**समयः**- 02.30.P.M.to 5.30 P.M.] [ Max. Marks : 100

---

**सूचना-सर्वे प्रश्नाः समाधेयाः**

**I. एतानि वचनानि व्याख्यात** **05x12=40**

१. भवेदुकारकारोर्ध्वो हलामत्तु र एफगः ।

२. पदवर्णस्वराङ्गानां द्विर्द्विर्युक्ते च संहिता ।

३. अनुलोमः स्वपाठःस्याद्विलोमः सन्धिनिर्मितः ।

४. ऊकारः स्थित ओकारोऽप्यकारव्यञ्जनोत्तरः ।

५. संहितावत्क्रमो ज्ञेयो जटा च विकृतादिषु ।

**II.** हस्तस्वरविन्यासक्रमं यथावचनं व्याख्यात। **10**

**III.** अङ्गताविषयं यथासूत्रं व्याख्यात **10**

**IV. वचनानि पूरयत** **06x05=30**

१. नवदशाज्झलो........। २. चावोक्त एकमात्रः.....।

३. मध्ये नकारे .........। ४. कण्ठो वक्त्रादि........।

५. वायौ चरत्युरसि......। ६. सर्ववर्णान्..............।

**V. पदार्थं विवृणुत** **05x02=10**

१. पूर्वागमः २. उरस्यम्

३. रङ्गसञ्ज्ञः ४. माण्डूकोष्ठ्यः

५. अध्यणुमात्रिकः

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 1

**Code No. : M.F.V.D.KY-15**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए.१ – विद्वदुत्तमा- प्रथमवर्षः

## शास्त्रम्–कृष्णयजुर्वेद-सलक्षणघनान्तम्

### भागः - १, पत्रिका -५

### विषयः -चरणव्यूहसूत्रम्-वर्णस्थानकरणप्रयत्नविवेकः

**दिनाङ्कः** - 01-04-2016 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**सूचना-सर्वे प्रश्नाः समाधेयाः**

**I.** **चरणव्यूहोक्तप्रधानविषयः कः ? विशदयत ।** **20**

**II.** **चरणव्यूहोक्त-ऋचाम्, यजुषाम्, साम्नाम् अथर्वणस्य च अध्ययनक्रमं निरूपयत ।** **20**

**III.** **स्थानकरण-प्रयत्नानां लक्षणं किम् ? यथासूत्रं निरूपयत ।** **20**

**IV.** **एतेषां वर्णानां स्थानं करणं च सूचयत** **10x02=20**

१. लृकारः

२. अनुस्वारः

३. विसर्जनीयः

४. अवर्णः

५. कवर्गप्रथमयमः

६. चवर्गप्रथमयमः

७. पकारः

८. हकारः

९. ऊष्माणः

१०. नासिक्याः

५. अध्यणुमात्रिकः

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 1

**Code No. : M.F.V.D.KYS-55**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम् .ए.१ – विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्–कृष्णयजुर्वेद-श्रौतप्रयोगः

### भागः - १, पत्रिका -५

### विषयः -आपस्तम्बोक्त ऐष्टिक-पाशुककर्माणि

**दिनाङ्कः** - 01 -04-2016 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**सूचना-सर्वे प्रश्नाः समाधेयाः**

I. पुनराधाने निमित्तं किम् ? तत्प्रकरणं यथासूत्रं व्याख्यात । 20

II. सर्वासामिष्टीनां का प्रकृतिः ? किमर्थम् ? सोपपत्तिकं निरूपयत । 20

III. दर्शपूर्णमासावारभमाणस्य द्वौ सारस्वतौ होमौ विहितौ । तौ यथामन्त्रं व्याख्यात । 20

IV. पशुबन्धे कति अङ्गानि अवदीयन्ते ? कानि तानि ? सञ्ज्ञपनं यथासूत्रं व्याख्यात । 20

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 1

**Code No. : M.F.V.D.KYM-60**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए.१ – विद्वदुत्तमा - प्रथमवर्षः

## शास्त्रम्–कृष्णयजुर्वेद-स्मार्तप्रयोगः

### भागः - १, पत्रिका -५

### विषयः -आपस्तम्बोक्त पितृमेधसूत्रं-धमसूत्रञ्च

दिनाङ्कः - 01-04-2016 ] [ गरिष्ठाङ्काः - ८०

समयः- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**सूचना-सर्वे प्रश्नाः समाधेयाः**

I. दुर्मरणे प्रायश्चित्तं किम् ? यथासूत्रं निरूपयत । **20**

II. अस्थिसञ्चयनक्रमं यथासूत्रं व्याख्यात । **20**

III. एकोद्दिष्टस्वरूपं किम् ? यथासूत्रं व्याख्यात । **20**

IV. स्नातकव्रतानि यतासूत्रं निरूपयत । **20**

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 1

**Code No. : M.S.V.D.KY-15**

# स्नातकोत्तरपरीक्षाः–२०१६

## बि.ए.२ – विद्वदुत्तमा - द्वितीयवर्षः

## शास्त्रम्–कृष्णयजुर्वेद-सलक्षणघनान्तम्

### भागः - १, पत्रिका -५

### विषयः -सलक्षणघनसन्धिसमन्वयः

**दिनाङ्कः** - 01-04-2016 ] [ **गरिष्ठाङ्कः** - ८०

**समयः**- 02.30.P.M.to 5.30 P.M.] [ Max. Marks : 80

---

**सूचना-सर्वे प्रश्नाः समाधेयाः**

**I.** जटायां पञ्चसन्धयः के ? सोदाहरणं विवृणुत । **20**

**II.** ध्वनिः-स्थानं-करणं-प्रयत्नः- सोदाहरणं निरूपयत । **20**

**III.** काल-स्वरः-देवता-जातिः-सोदाहरणं निरूपयत । **20**

**IV.** स्वरितलक्षणं किम् ? सप्तविधस्वरितं सोदाहरणं व्याख्यात । **20**

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 1

**Code No. : M.S.V.D.KYS-55**

# स्नातकोत्तरपरीक्षाः—२०१६

## एम्.ए.२ – विद्वदुत्तमा- द्वितीयवर्षः

## शास्त्रम्—कृष्णयजुर्वेद-श्रौतप्रयोगः

### भागः - १, पत्रिका -५

### विषयः -आपस्तम्बोक्त-सौमिक-अग्निचयनकर्माणि

**दिनाङ्कः** - 01-04-2016 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- 02.30.P.M.to 5.30 P.M.] [ Max. Marks : 80

---

**सूचना-सर्वे प्रश्नाः समाधेयाः**

I. प्रातस्सवनं कदा अनुष्ठीयते ? कथम् ? सभाष्यं निरूपयत । **20**

II. महाभिषवप्रकारमुपवर्णयत । **20**

III. शतरुद्रीयं वसोर्धारां च यथाभाष्यं निरूपयत । **20**

IV. अहीन-सत्रभेदं सभाष्यं व्याख्यात । **20**

—०—

Total No. of Questions : 4 ] [ Total No. of Printed Pages : 1

**Code No. : M.S.V.D.KYM -60**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए.२ – विद्वदुत्तमा- द्वितीयवर्षः

## शास्त्रम्–कृष्णयजुर्वेदः-स्मार्तप्रयोगः

### भागः - १, पत्रिका -५

### विषयः -आपस्तम्बीय-गृह्यकर्माणि-मन्त्रप्रश्नभाष्यसहितानि

**दिनाङ्कः** - 01 -04-2016 ] [ **गरिष्ठाङ्कः** - ८०

**समयः**- 02.30.P.M.to 5.30 P.M.] [ Max. Marks : 80

---

**सूचना-सर्वे प्रश्नाः समाधेयाः**

I. प्राग्घोमात् इति सूत्रमारभ्य लाजाहोमं सभाष्यं व्याख्यात । **20**

II. अग्निमुखं सभाष्यं व्याख्यात । **20**

III. मासिश्राद्धकर्म यथासूत्रं निरूपयत । **20**

IV. मधुपर्कः केभ्यो विहितः ? तद्विधानं सभाष्यं निरूपयत । **20**

—०—

Total No. of Questions :6] [ Total No. of Printed Pages : 1

**Code No. : M.F.V.D.SY -10**

# स्नातकोत्तरपरीक्षा:—२०१६

## एम्.ए.१ – विद्वदुत्तमा- प्रथमवर्षः

## शास्त्रम्—शुक्लयजुर्वेदः-घनान्तः

### भागः - १, पत्रिका -५

## विषयः -वाजसनेयप्रातिशाख्यम्

**दिनाङ्कः** - 01 -04-2016 ] [ **गरिष्ठाङ्कः** - ८०

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. सूत्राणि विवृणुत** **05x03=15**

१. सन्ध्यक्षरं परम् । २. त्रयो नीचस्वपराः । ३. करनुदात्तम् ।

४. प्रगृह्यम् । ५. उपदिष्टा वर्णाः ।

**II. पूरयत** **05x04=20**

१. स्वरित........................पदम् ।

२. पदपूर्व...................पादादो ।

३. इन्द्राबृहस्पति..................इति त्रीणि ।

४. द्वन्द्वं............................वायुषु ।

५. यथा.......................ग्निभ्यः ।

**III. सूत्रसहितं व्याख्यात** **05x03=15**

१. का संहिता ? २. कः सन्धिः ३. अपृक्तः कः ?

४. का उपधा ? ५. किन्नाम प्रगृह्यम् ?

**IV. वर्णसमाम्नायम् विवृणुत** **10**

**V. स्पष्टयत** **10**

१. स्वराः २. व्यञ्जनानि ३.क्षैप्रः

४. अणु ५. ऊष्माणः

**VI. काः वर्णदेवताः ? सूत्ररीत्या विवृणुत** **10**

—०—

Total No. of Questions : 4] [ Total No. of Printed Pages : 1

**Code No. : M.F.V.D.SYS -45**

# स्नातकोत्तरपरीक्षा:–२०१६

## एम्.ए.१ – विद्वदुत्तमा- प्रथमवर्षः

## शास्त्रम्–शुक्लयजुर्वेदः-श्रौतप्रयोगः

### भागः - १, पत्रिका -५

## विषयः -कात्यायनश्रौतसूत्रम्

**दिनाङ्कः** - 01-04-2016 ] [ **गरिष्ठाङ्कः** - ८०

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. सूत्राणि विवृणुत** **05x05=25**

१. अथातोऽधिकारः । २. स्त्रीचाविशेषात् । ३. स्वामीफलयोगात् ।

४. मध्यमेनेडायाः । ५. प्रतिप्रणवमाधानम् ।

**II. सूक्ष्मरीत्या उत्तरयत** **05x05=25**

१. चातुर्मास्य यागारम्भकालः कः ?

२. वैश्वदेवपर्वम् किम् ?

३. पित्र्येष्टिः कः ?

४. मित्रविन्देष्टिः कः ?

५. निरूढपशुबन्धकालः कः ?

**III. टिप्पणीं कुरुत ।** **05x03=15**

१. रथकारः २. दक्षिणाग्निः ३. वेदिः

४. स्रुवः ५. पृषदाज्यम्

**IV. सूत्राणि पूरयत** **05x03=15**

१. निषदस्थपति.................कृतः ।

२. उपविष्टहोमः.............जुहोतयः ।

३. फलयुक्ताना...............फलार्थित्वात् ।

४. विगुणे.......................भेदात् ।

५. मन्त्रान्तैः...................भिधानात् ।

—०—

Total No. of Questions : 4] [ Total No. of Printed Pages : 1

**Code No. : M.F.V.D.SYM -50**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए.१ – विद्वदुत्तमा- प्रथमवर्षः

## शास्त्रम्–शुक्लयजुर्वेदः-स्मार्तप्रयोगः

### भागः - १, पत्रिका -५

### विषयः -कात्यायनगृह्यसूत्रम्, याज्ञवल्क्यस्मृतिश्च

**दिनाङ्कः** - 01 -04-2016 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. सूत्राधारतया विवृणुत** **05x04=20**

१. के षडर्घ्यभाजनाः ? २. किमश्मानमारोहणम् ?

३. चतुर्थीकर्म विवृणुत । ४. सीमन्तोन्नयनम् किम् ? ५. किन्नाम चूडाकरणम् ?

**II. रिक्तस्थलानि पूरयत** **05x04=20**

१. सांवत्सरीकस्य चूडा.................केशान्तः ।

२. अष्टवर्षं.............................राजन्यम् ।

३. अथ भिक्षा...............प्रख्यायिन्यः ।

४. अथातोध्यायोपा..............हस्तेन वा ।

५. अथातः श्रावणकर्म................अन्याहुतीजुहोति ।

**III. याज्ञवल्क्यस्मृतिरीत्या उत्तरयत** **05x04=20**

१. कस्मिन्नग्नौ किं कर्तव्यम् ? २. साधारणधर्माः के ?

३. कथं यज्ञपात्राणां शुद्धिः ? ४. भूशुद्धिः कथम् ? ५. किन्नाम द्रव्यम् ।

**IV. श्लोकानि पूरयत** **05x04=20**

१. यः कश्चिदर्थो.......................पूर्वकम् ।

२. लेख्यस्य.........................चिह्नितम् ।

३. देशान्तरस्थे...................कारयेत् ।

४. सगौर सर्षपै...................तथा ।

५. मुखजा......................शुचिः ।

—०—

Total No. of Questions : 5] [ Total No. of Printed Pages : 1

**Code No. : M.S.V.D.SY -10**

# स्नातकोत्तरपरीक्षाः—२०१६

## एम्.ए.२ – विद्वदुत्तमा- द्वितीयवर्षः

## शास्त्रम्—शुक्लयजुर्वेदः-घनान्तः

### भागः - १, पत्रिका -५

## विषयः -वाजसनेयीप्रातिशाख्यम्

**दिनाङ्कः** - 01 -04-2016 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- 02.30.P.M.to 5.30 P.M.] [ Max. Marks : 80

---

**I. सूत्राणि विवृणुत** **05x04=20**

१. स्वरितवान् स्वरितः । २. स्पर्शोऽपञ्चमः स्वरधौ तृतीयम् ।

३. अविद्यासम्भूत्योश्च । ४. एदोद्भ्यां पूर्वमकारः ५. सुपदावसानवर्जम् ।

**II. इमानि पूरयत** **05x04=20**

१. यमान् विद्यादय.....................विनिर्दिशेत् ।

२. ज्वालापिण्डा........................वज्रवत् ।

३. पुनरुक्ति...........................वशादिति ।

४. द्वे द्वे पदे..........................वर्जम् ।

५. विशौजाः.........................समानात् ।

**III. सूत्ररीत्या व्याख्यात** **05x04=20**

१. अनुदात्तमाख्यातमामन्त्रितवत् । २. द्विस्पर्शम् ।

३. अथावसानानि । ४. उत्तमान्तमुत्तमेन । ५. आपूजजातयोः ।

**IV. क्रमप्रयोजनं सूत्ररीत्या विवृणुत ।** **10**

**V. परिचयत** **05x02=10**

१. आमन्त्रितम् । २. उपसर्गः । ३. समासः ।

४. आम्रेडितम् । ५. नेत् ।

—०—

Total No. of Questions : 3] [ Total No. of Printed Pages : 1

**Code No. : M.S.V.D.SYS -45**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए.२ – विद्वदुत्तमा- द्वितीयवर्षः

## शास्त्रम्–शुक्लयजुर्वेदः-श्रौतप्रयोगः

### भागः - १, पत्रिका -५

### विषयः -कात्यायनश्रौतसूत्रम्

**दिनाङ्कः** - 01-04-2016 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- 02.30.P.M.to 5.30 P.M.] [ Max. Marks : 80

---

**I. सूत्राधारतया विवृणुत** **04x05=20**

१. उभयतः शुक्लपक्षौ बृहस्पतिसवेन यजते ।

२.राज्ञो राजसूयोऽनिष्टिनोवाजपेयेन ।

३. उत्तरे शुक्लपक्षे सौत्रामणी ।

४. उखा सम्भरणमष्टम्याम् ।

**II. सङ्क्षेपेण उत्तरयत** **04x10=40**

१. चयननिरूपणम् ।

२. सौत्रामणीनिरूपणम् ।

३. अश्वमेधप्रकरणम् ।

४. पुरुषमेधप्रकरणम् ।

**III. परिचयत** **05x04=20**

१. अहीनयज्ञम् । २. प्रवर्ग्यम् ।

३. गार्हपत्यः । ४. सर्वमेधः ।

५. यूपः

—०—

Total No. of Questions : 4] [ Total No. of Printed Pages : 1

**Code No. : M.S.V.D.SYM -50**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए.१ – विद्वदुत्तमा- द्वितीयवर्षः

## शास्त्रम्–शुक्लयजुर्वेदः-स्मार्तप्रयोगः

### भागः - १, पत्रिका -५

## विषयः -कात्यायनगृह्यसूत्रम्, याज्ञवल्क्यस्मृतिश्च ।

**दिनाङ्कः** - 01-04-2016 ] [ **गरिष्ठाङ्कः** - ८०

**समयः**- 02.30.P.M.to 5.30 P.M.] [ Max. Marks : 80

---

**I. अधोनिर्देशितप्रकरणानां सूत्ररीत्या उत्तरयत** **05x04=20**

१. अनाहिताग्नेर्नवप्राशनम् । ३. मागशीर्ष्यां पौर्णमास्याग्रहायणीकर्म ।

३. आग्रहायण्यास्तिस्रोऽष्टकाः । ४. शालाकर्म । ५. मणिकावधानम् ।

**II. पूरयत** **05x04=20**

१. अथातो वापीकूप.................व्याख्यास्यामः ।

२. अथातः शौचविधिं.................दक्षिणकर्णे वा ।

३. अथातो नित्यस्नानं.......................देशे स्थाप्य ।

४. उत्तीर्य धौते वाससी ...................ऊर्ध्वबाहुः ।

५. ततस्तर्पयेद्..........................पुराणाचार्यान् ।

**III. याज्ञवल्क्यस्मृतिरीत्या विवृणुत** **05x04=20**

१. पिता धनविभागं कथं करोति ।

२. समविभागे विशेषः किम् ?

३. कर्तुर्दण्डविधानं तज्ज्ञानोपायं किम् ?

४. सङ्ग्रहणे किं दण्डम् ?

५. प्रायश्चित्तप्रकरणे को दोषः ?

**IV. श्लोकान् पूरयत ।** **05x04=20**

१. महापातक................नस्त्विह । २. पुमान्सङ्ग्रहणे...........द्वयोस्तथा ।

३. विभागं चेत्................समांशिनः । ४. पितृद्रव्य.............तद्भवेत् ।

५. व्यवहारानृपः...........विवर्जितः ।

—०—

Total No. of Questions : 4] [Total No. of Printed Pages : 1

**Code No. : M.F.V.D.SS -65**

# स्नातकोत्तरपरीक्षाः—२०१६

## एम्.ए.१ – विद्वदुत्तमा- प्रथमवर्षः

## शास्त्रम्—सामवेदः-श्रौतप्रयोगः

### भागः - १, पत्रिका -५

### विषयः -श्रौतप्रयोगः

**दिनाङ्कः** - 01-04-2016 ] [ **गरिष्ठाङ्कः** - ८०

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. ग्रन्थोक्तदिशा सम्यक् निरूपणं कुरुत (द्वावेव)** **02x15=30**

१. मधुपर्कप्रयोगः । २. विश्वरूपा गानम् ।

३, कुशालक्षणम् ४. यज्ञायज्ञीयस्तोत्रम्, तस्य धर्माः ।

**II. षण्णां सूत्राणां व्याख्यानं कुरुत** **06x05=30**

१. स्वयं व्रजेत् क्रय औपवसथ्ये वा । २. प्रत्येकं नाम..........यानि स्युः ।

३. तस्यान्ते श्वःसुत्या गौतमस्य । ४. सर्वत्रानादेशे..........स्वासु ।

५. तेषां स्थाने..........बृहत् इति । ६. संसतु सोमे.....घन्दांस्यादिशन् ।

७. तत्प्रभृतीनि रात्रौ । ८. षोडशि........यस्मादन्य इति ।

९. तस्मात् व्रतं..........गोतमाः । १०. नवमस्य ज्योतिष्टोमः.....इत्येके ।

**III. सूत्राणि विवृणुत** **05x02=10**

१. दूरं व्रजित्वा विहाय दौष्कृत्यमिति ।

२. अग्रेति समानेऽहनि ।

३. प्रवर्ग्यवत्युत्तरेण........गायेत् ।

४. एतान्येव........यावन्तः स्युः ।

६. अत्र तु बहिष्पवमानस्य ।

**IV. एषामर्थो वर्णनीयः** **10x01=10**

१. आर्षेयः २. साधुचरणः ३. अन्यूनाङ्गः

४. सोमप्रवाकः ५. उदपानः ६. लोकसामानि ।

७. सञ्चितमग्निः ८. रौरिकीणि ९. विषुवान् १०. सम्भार्यः

—०—

Total No. of Questions : 4] [Total No. of Printed Pages : 1

**Code No. : M.F.V.D.S -20**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए.१ – विद्वदुत्तमा- प्रथमवर्षः

## सामवेदः-लक्षणम्

### भागः - १, पत्रिका -५

**दिनाङ्कः** - 01-04-2016 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. व्याकुरुत (द्वावेव)** **02x15=30**

१. सञ्ज्ञाप्रकरणम्-सामतन्त्रोक्तदिशा सम्यक् निरूपयत ।

२. वाचो वृत्तिं ऋक्तन्त्रोक्तदिशा विशदयत ।

३. नु भावं सामतन्त्रसूत्राण्युदाहृत्य विवृणुत ।

४. महिगीणापर्व इति किम् ? सूत्राण्युदाहृत्य यथाभाष्यं लिखत ।

**II. सूत्राणि व्याख्यात (षडेव)** **06x05=30**

१. वृद्धे पासाया ष्टे ।

२. ह्रस्वमघोषादि सस्वरे ।

३. जि दीर्घं मन्द्रान्ते ।

४. निधने डिवति द्वितीयश्च ।

५. लावव्यपरौ ।

६. सन्ध्ये परं सामर्थ्ये ।

७. उभयथा भुवोम्नः ऊधरवः ।

८. आवइप्राप्त...........आमहीयवयोः ।

९. सिते योदे सर्वत्र.....सर्वत्र ।

१०. नवे मन्त्राभि मत्स सुषा ।

**III. यथाभाष्यं लिखत** **05x02=10**

१. न ज्ररे ।

२. तालव्यादेर्म ।

३. स्पर्शेर्गस्य ।

४. हव्ये च

५. पृथिवीं प्रदैभ्यन्ते ।

**IV. एषां सञ्ज्ञाक्षराणां अर्थं लिखत ।** **10x01=10**

१. अण्

२. इञु

३. उञु

४. खट्

५. ओदः

६. ग्

७. डु

८. त

९. सण्

१०. लुप्

—०—

Total No. of Questions : 4]    [ Total No. of Printed Pages : 1

**Code No. : M.S.V.D.S-20**

# स्नातकोत्तरपरीक्षाः—२०१६

## एम्.ए.२ – विद्वदुत्तमा- द्वितीयवर्षः

## शास्त्रम्—सामवेदः

**भागः - १, पत्रिका -५**

## विषयः -सामवेदलक्षणम्

**दिनाङ्कः** - 01 -04-2016 ]    [ **गरिष्ठाङ्काः** - ८०

**समयः**- 02.30.P.M.to 5.30 P.M.]    [ Max. Marks : 80

---

**I. ग्रन्थोक्तदिशा सम्यक् निरूपणं कुरुत (द्वावेव)** **02x15=30**

१. विकर्षभावं सामतन्त्रोक्त-उदाहरणपूर्वकं निरूपयत ।

२. औमहि इत्यारभ्य ईशे इत्यन्तमुक्तं-औभावं निरूपयत ।

३. सोष्मण ऊष्मा इत्यारभ्य मो सन्ध्यः सूत्रपर्यन्तं सोदाहरणं विवृणुत ।

४. कुवित्स्वासु इत्यारभ्य त्रीणिधनेषु इत्यन्तमुक्तं-अतिहारभावं विवृणुत ।

**II. सूत्राणि व्याख्यात (षडेव)** **06x05=30**

१. स्वे स्वर परे ।    २. डि क्षरिणि शतायाम् ।

३. नरे देस्थे ।    ४. व्यवधानोऽन्त्य विकारः ।

५. दीर्घं भाषायां प्रापवृणोतौ संवरणे ।    ६. रं ह्वात् ।

७. यथा......साध्रेषु ।    ८. दान्त्यस्य.........पङ्क्षायाम् ।

९. आर्चिकं निधनं........वृधे स्वरम् ।    १०. ष्टम्भे चौशसूपे ।

**III. यथाभाष्यं लिखत** **05x02=10**

१. णि    २. एहाइ    ३. तालव्ये न तोकात् ।

४. हिर्वा वारवन्तीथे ।    ५. द्वादश हरिश्रीयन्ते ।

**IV. अधोनिर्दिष्टानां अर्थं लिखत** **10x01=10**

१. त    २. तुद्रू    ३. दिञु

४. नु    ५. वि    ६. शु

७. सक्    ८. हि    ९. चु    १०. खिड्

—०—

Total No. of Questions : 4]  [Total No. of Printed Pages : 1

**Code No. : M.S.V.D.SS -65**

# स्नातकोत्तरपरीक्षाः—२०१६

## एम्.ए.२ – विद्वदुत्तमा- द्वितीयवर्षः

## शास्त्रम्—सामवेदः-श्रौतप्रयोगः

### भागः - १, पत्रिका -५

### विषयः -श्रौतप्रयोगः

**दिनाङ्कः** - 01-04-2016 ]  [ **गरिष्ठाङ्काः** - ८०

**समयः**- 02.30.P.M.to 5.30 P.M.]  [Max. Marks : 80

---

**I. ग्रन्थोक्तदिशा सम्यक् निरूपणं कुरुत (द्वावेव)** **02x15=30**

१. महाव्रते परिमादगानम् ।

२. 'ब्रह्मणः सर्वकर्मसु उपवेशनम्' इत्यारभ्य 'उद्गातुः ब्रह्मणो वा गानं' इत्यन्तं ब्रह्मणः कर्मस्वरूपं यथाभाष्यं व्याकुरुत ।

३. ऊहस्य पौरुषेयत्वापौरुषेयत्वविचारः तथा विचारस्य सिद्धान्तः ।

४. संस्कृतिप्रतिहारविचारः ।

**II. षण्णां सूत्राणां व्याख्यानं कुरुत** **06x05=30**

१.त्वं वागसि.......पृथगाहत्यवालधानेन ।

२. विलिखिते..........उपविशेत् ।

३. सन्त्वा हिन्वन्ति..........उत्तरं निधनम् ।

४. तस्य..........पर्यायादिषु वा ।

५. यथाशिषं वा विदध्यात् ।

६. तथा कुर्वन्..........शाण्डिल्यः ।

७. तृचसूक्तानां..............अनादेशे ।

८. वामदेव्यं............. त्रीणि ।

९. चतुष्टयानि सामानि.....सौमित्रम् ।

१०. तेभ्यो..........सहोपेयुरनादेशे ।

**III. सूत्राणि विवृणुत** **05x02=10**

१. आह्रियमाणे..........भरीमभिरिति ।

२. आग्नीध्रीयं.........अनुगच्छेत् ।

३. एकर्चस्थानेषु.........आर्भवे ।

४. संलंधितायामिति भाडितायनः ।

५. प्रत्यक्षपरोक्ष तत्कुर्यात् ।

**IV. एतेषां अर्थो वर्णनीयः** **10x01=10**

१. एकाग्निः
२. चातुष्प्राश्यं
३. अग्निपदम् ।
४. वाजिनं
५. घर्मः
६. प्रैषा
७. महावीराः
८. उपाय
९. समाधिः
१०. ऊपाः

Total No. of Questions : 5] [ Total No. of Printed Pages : 2

**Code No. : M.F.V.D.R -05**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए.१ – विद्वदुत्तमा-प्रथमवर्षः

## शास्त्रम्–ऋग्वेदसलक्षणघनान्तः

### भागः - १, पत्रिका -५

## विषयः -शौनकीयप्रातिशाख्यम्

**दिनाङ्कः** - 01-04-2016 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. अधोनिर्दिष्टेषु पञ्च सूत्राणि व्याख्यात** **05x04=20**

१. स्वरभक्तिः पूर्वभागक्षराङ्गम् ।

२. सर्वशास्त्रार्थं प्रतिकण्ठमुक्तम् ।

३. पूर्वो नन्ता नतिषु नम्यमुत्तमम् ।

४. संहिता पदप्रकृतिः ।

५. जामातर्दुहितर्दर्तः प्रशास्तरवितः पितः ।
दोषावस्तरवस्पर्तः प्रयन्तश्चेङ्ग्यमुत्तमम् ।।

६. सा वा स्वरभक्तिकाला ।

७. पुरएता तितउना प्रउगं नमउक्तिभिः । अन्तःपदं विवृत्तयः ।

८. उदात्तपूर्वं स्वरितमनुदात्तं पदेऽक्षरम् ।

**II. एतेषु पञ्चानां सूत्राणां तात्पर्यं लिखत** **05x04=20**

१. श्रद्धा सम्राज्ञी सुशमी स्वधोती पृथुज्रयी पृथिवीषा मनीषा ।
अया निद्रा ज्या प्रपेति स्वराणां मुख्ये परे पञ्चमषष्ठयोश्च ।।

२. जात्यवद्धा तथा वान्तौ तनू शचीति पर्वयोः ।

३. शुनश्चिश्चेपं निदितं नरा वा शंसं पूषणम् ।
नरा च शंसं दैव्यं ता अनानुपूर्व्यसंहिताः ।।

४. कबन्धं पृथुकण्वासः पुत्रः पातु पथा पयः ।
पायुः पृष्ठे पदं तेषां प्रवादा उदये दिवः ।।

५. तपोष्पवित्रं त्रिष्पूत्वी धीष्पीपाय विभिष्पतात् ।
द्यौष्पिता रजसस्पृष्टो दुदुष्पज्राय नस्करः ।।

–अनुवर्तते

६. बोधा स्तोत्रे चकृमा ब्रह्मवाहः शंसा गोषूच्छा दुहितर्वदा तना ।
अजा नष्टं जम्भया ता अधा महो गन्ता मायुक्ष्वा हि सृजा वनस्पते ।।

७. पदक्रमविभागज्ञो वर्णक्रमविचक्षणः ।
स्वरमात्रविशेषज्ञो गच्छेदाचार्यसम्पदम् ।।

**III. अनुस्वारो व्यञ्जनं स्वरो वा इति सूत्रमधिकृत्य यथामति विवृणुत ।** 10

**IV. एतेषु पञ्चानामर्थं लिखत** 05x02=10

१. विवृत्तिः २. स्वरभक्तिः ३. रक्तः

४. प्लुतिः ५. क्रमः ६. नामी ७. स्वराः

**V. मन्त्रद्वयस्य जटापाठं लिखत** 02x10=20

१. प्रवःपान्तं..........................।।

२. सक्तुमिव तितउना..................।।

३. निषुसीद गणपते...................।।

४. समानी व आकूतिः.................।।

—०—

Total No. of Questions : 4] [Total No. of Printed Pages : 1

**Code No. : M.F.V.D.R.S -35**

# स्नातकोत्तरपरीक्षाः—२०१६

## एम्.ए.१ – विद्धदुत्तमा-प्रथमवर्षः

## शास्त्रम्—ऋग्वेदः-श्रौतप्रयोगः-१

### भागः - १, पत्रिका -५

### विषयः -आश्वलायनश्रौतसूत्रम्,(नारायणवृत्तिसहितम्)

**दिनाङ्कः** - 01-04-2016 ] [ **गरिष्ठाङ्कः** - ८०

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. अधोनिर्दिष्टेषु पञ्च सूत्राणि व्याख्यात** **05x06=30**

१. अथैतस्य समाम्नायस्य विताने योगापत्तिं वक्ष्यामः ।

२. जपानुमन्त्राणाप्यायनोपस्थानान्युपांशु ।

३. एष ब्रह्मजपः सर्वयज्ञतन्त्रेषु साग्नौ यत्रोपवेशनम् ।

४. पौर्णमासेनेष्टिपशुसोमा उपदिष्टाः ।

५. होत्राचमनयज्ञोपवीतशौचानि ।

६. सर्वे संस्थाजपेनोपतिष्ठन्त उपतिष्ठन्ते ।

७. आग्रयणं व्रीहिश्यामकयवानाम् ।

**II. एतेषु पञ्च सूत्राणि विवृणुत** **05x04=20**

१. चात्वालं चात्वालवत्सु । २. ऋचं पादग्रहणे । ३. प्रेषितो जपति ।

४. आपद्यतो रेवा अवन्तु न इति जपेत् । ५. मार्जयित्वाऽनुयाजैश्चरन्ति ।

६. वसन्ते पर्वणि ब्राह्मण आदधीत । ७. पयसा नित्यहोमः ।

**III. एतेषु पञ्चानामर्थं लिखत** **05x02=10**

१. होता २. आग्रयणम् ३. इळाभक्षणम्

४. सामिधेनी ५. उपांशुः ६. दक्षिणाग्निः ७. व्याहृतयः

**IV. उत्तरं लिखत** **05x04=20**

१. अग्नआयूंषि पवस इति तिसृभिः इति सूत्रोक्तमन्त्रान् लिखत ।

२. इदमापः प्रवहत........इति मन्त्रं पूरयत ।

३. आयुराशास्ते.........इति मन्त्रं पूरयत ।

४. अयाश्चाग्ने ......इति मन्त्रं पूरयत ।

—०—

Total No. of Questions : 4] [ Total No. of Printed Pages : 1

**Code No. : M.F.V.D.R.M -40**

# स्नातकोत्तरपरीक्षाः—२०१६

## एम्.ए.१ – विद्वदुत्तमा-प्रथमवर्षः

## शास्त्रम्—ऋग्वेदः-स्मार्तप्रयोगः-१

### भागः - १, पत्रिका -५

### विषयः -आश्वलायनगृह्यसूत्रम्, लघ्वाश्वलायनस्मृतिश्च

**दिनाङ्कः** - 01 -04-2016 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- 10.00 A.M. to 1.00 P.M. ] [ Max. Marks : 80

---

**I. अधोनिर्दिष्टेषु पञ्च सूत्राणि व्याख्यात** **05x05=25**

१. हुता अग्नौ हूयमाना अनग्नौ प्रहुता ब्राह्मणभोजने ब्रह्मणिहुताः ।

२. अथ सायम्प्रातः सिद्धस्य हविष्यस्य जुहुयात् ।

३. कृताकृतमाज्यहोमेषु परिस्तरणम् ।

४. सार्वकालिकमेके विवाहम् ।

५. मेखलामाबध्य दण्डं प्रदाय ब्रह्मचर्यमादिशेत् ।

६. बुद्धिरूपशीललक्षणसम्पन्नामरोगामुपयच्छेत।

७. चरितव्रतः सूर्यविदे वधूवस्त्रं दध्यात् ।

**II. पञ्च सूत्राणि व्याख्यात** **05x05=25**

१. एषोऽवदानधर्मः ।

२. बुद्धिमते कन्यां प्रयच्छेत् ।

३. अथ पार्वण स्थालीपाकः ।

४. मयि मेधां.....भूयासम् -पूरयत ।

५. श्रावण्यां पौर्णमास्यां श्रवणाकर्म ।

६. अलङ्कृत्य कन्यामुदकपूर्वां दद्यादेष ब्राह्मो विवाहः ।

७. विवाहाग्निमग्रतोऽजस्रं नयन्ति ।

**III. एषु पञ्च सूत्राणामर्थं लिखत ।** **05x05=25**

१. त्रयः पाकयज्ञाः ।

२. इह प्रियं प्रजया ते समृध्यतामिति गृहं प्रवेशयेत् ।

३. अथाम्यृच उदाहरन्ति 'यः समिधाय आहुती यो वेदेनेति' ।

४. द्व्यक्षरं प्रतिष्ठाकामश्चतुरक्षरं ब्रह्मवर्यसकामः ।

५. 'जीवं रुदन्ति इति रुदत्याम् ।

६. ब्रह्मा वैतानि धारयेत् ।

**IV. स्विष्टकृद्धोममन्त्रं लिखत** **05x04=20**

—०—

Total No. of Questions : 5] [ Total No. of Printed Pages : 2

**Code No. : M.S.V.D.R -05**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए.२ – विद्वदुत्तमा-द्वितीयवर्षः

## शास्त्रम्–ऋग्वेदः-सलक्षणघनान्तः

### भागः -१ , पत्रिका -५

## विषयः -शौनकीयप्रातिशाख्यम्

**दिनाङ्कः** - 01-04-2016 ] [ **गरिष्ठाङ्कः - ८०**

**समयः**- 02.30.P.M.to 5.30 P.M.] [ Max. Marks : 80

---

**I. अधोनिर्दिष्टेषु पञ्च सूत्राणि व्याख्यात** **05x04=20**

१. तत् स्थितोपस्थितं नाम यत्रोभे आह संहिते ।

२. शौद्धाक्षरागमोऽपैति ।

३. अथार्ष्यलोपेन यदाह स क्रमः समनकालं पदसंहितं द्वयोः ।

४. यथापदं सन्धिमपेतहेतुषु ।

५. रक्तो वचनो मुखनासिकाभ्याम् ।

६. त्रीणि मन्द्रं मध्यममुत्तमं च स्थानान्याहुः सप्तयमानि वाचः ।

७. ऋषीणां तु त्रयो वर्गाः सप्तका एकधेतरे ।

**II. एतेषु पञ्चानां सूत्राणां तात्पर्यं विवृणुत** **05x04=20**

१. पञ्च्यां द्वाभ्यामभिक्रम्य प्रत्यादायोत्तरं तयोः ।
उत्तरेणोपसन्दध्यात्तथार्धर्चं समापयेत् ।।

२. नकारस्योष्मवद् वृत्तं प्लुतोपाचरिते नतिः ।
प्रश्लेषश्च प्रगृह्यस्य प्रकृत्या स्युः परिग्रहे ।।

३. नुदेचचि शौद्धाक्षरसन्ध्यमागमम् ।

४. तिस्रो वृत्तीरुपदिशन्ति वाचो विलम्बितां मध्यमां च द्रुतां च ।

५. पारायणं वर्तयेद् ब्रह्मचारी गुरुः शिष्येभ्यस्तदनुव्रतेभ्यः ।
अध्यासीनो दिशमेकां प्रशस्तां प्राचीमुदीचीमपराजितां वा ।।

६. प्रचोदितोऽभिक्रमते यथास्य क्रमः परस्ताद्विहितस्तथैव ।

७. गायत्री सा चतुर्विंशत्यक्षरा ।
अष्टाक्षरास्त्रयः पादाश्चत्वारो वा षळक्षराः ।।

–अनुवर्तते

**III. पद-क्रम-संहितानां लक्षणं विवृणुत** 01x10=10

**IV. एतेषु पञ्चानामर्थं लिखत** 05x02=10

१. क्रमः २. ह्रस्वः ३. उपस्थितम्

४. विवृतिः ५. स्वरभक्तिः ६. नामी

७. स्थितम् ८. प्लुतिः

**V. मन्त्रद्वयस्य घनपाठं लिखत** 02x10=20

१. गणानां त्वा गणपतिं................।।

२. गायत्रेण प्रतिमिमीते................।।

३. सविता पश्चातात्..................।।

४. अहं रुद्रेभिर्वसुभिः..................।।

—०—

Total No. of Questions : 4] [ Total No. of Printed Pages : 1

**Code No. : M.S.V.D.R.S -35**

# स्नातकोत्तरपरीक्षा:–२०१६

## एम्.ए.२ – विद्वदुत्तमा-द्वितीयवर्षः

## शास्त्रम्–ऋग्वेदः-श्रौतप्रयोगः

**भागः - २, पत्रिका -५**

## विषयः -आश्वलायनश्रौतसूत्रम् (नारायणवृत्तिसहितम्)

**दिनाङ्कः** - 01 -04-2016 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- 02.30.P.M.to 5.30 P.M.] [ Max. Marks : 80

---

**I. अधोनिर्दिष्टेषु पञ्च सूत्राणि व्याख्यात** **05x05=25**

१. जातवेदसे सुनवाम सोममित्याग्निमारुते जातवेदस्यानाम् ।

२. माध्यन्दिने तु होतुर्निष्केवल्ये स्तोमकारितं शस्यम् ।

३. आधिपत्यकामो ब्रह्मवर्चसकामो वा बृहस्पतिसवेन यजेत ।

४. सामसूक्तानि सप्रगाथानि सर्वपृष्ठेषु पृष्ठानि ।

५. हुत्वाऽहैतं स्थालीपाकं सर्वमशानेति ।

६. त्रिभिरवसानं चतुर्भिः प्रणवो यत्रार्धर्चशः पारुच्छेप्यः ।

७. कयानश्चित्र आभुवदित्येतासु रथन्तरं पृष्ठं तस्य योनिं शंसेत् ।

**II. एषु पञ्च सूत्राणि विवृणुत** **05x04=20**

१. भूतिकामो वा ग्रामकामो वा प्रजाकामो वोपहव्येन यजेत ।

२. पूर्वमक्षरं निहन्यते न्यूंख्यमाने ।

३. अथ राजसूयाः ।

४. सूक्तान्येव सूक्तस्थानेष्वहीनेषु ।

५. एकैकं ब्राह्मणस्पत्यानाम् ।

६. संशये बहिर्वेदि स्वाध्यायप्रयोगः ।

७. त्रिरात्रं वा नित्याध्यायेन ।

**III. उत्तरत** **03x10=30**

१. वायो शुक्रो, विहिहोत्रा, वायो शतं, इन्द्रश्च वायवेषामित्यादि प्रउगशास्त्रोक्तान् मन्त्रान् लिखत ।

२. आनोमित्रावरुणा मित्रं वयं हवामहे ।
मित्रं हुवे पूतदक्षमयं वो मित्रावरुणा ।। इति मन्त्रं लिखत ।

३. वायवायाहि वीतये इत्येका वायो याहि शिवा दिव इति द्वे इन्द्रश्च वायवेषां सुतानामिति मन्त्रं लिखत ।

**IV. आपो रेवतीः- इत्यादि मन्त्रं न्यूंखविधानेन लिखत ।** **05**

—०—

Total No. of Questions : 4] [ Total No. of Printed Pages : 2

**Code No. : M.S.V.D.R.M -40**

# स्नातकोत्तरपरीक्षाः–२०१६

## एम्.ए.२ – विद्वदुत्तमा-द्वितीयवर्षः

## शास्त्रम्–ऋग्वेदः-स्मार्तप्रयोगः

### भागः - २, पत्रिका -५

### विषयः -आश्वलायनगृह्यसूत्रम् लघ्वाश्वलायनस्मृतिश्च

**दिनाङ्कः** - 01-04-2016 ] [ **गरिष्ठाङ्काः** - ८०

**समयः**- 02.30.P.M.to 5.30 P.M.] [ Max. Marks : 80

---

**I. अधोनिर्दिष्टेषु पञ्च सूत्राणि व्याख्यात** **05x05=25**

१. अष्टमे वर्षे ब्राह्मणमुपनयेत् ।

२. सावित्रीमन्वाह पच्छोर्धर्चशः सर्वामिति तृतीयाम् ।

३. हृदयदेशेऽस्योर्ध्वाङ्गुलिं पाणिमुपदधाति ।

४. चरितव्रताय मेधाजननं करोति ।

५. यज्ञोपवीती नित्योदकः सन्ध्यामुपासीत वाग्यतः ।

६. त्रिरात्रमक्षारलवणाशिनः स्युः ।

७. मासिमासि पितृभ्योऽभ्यक्षु प्रतिष्ठापयेत् ।

८. यून ऋत्विजो वृणीत इत्येके ।

**II. पञ्च सूत्राणि विवृणुत** **05x05=25**

१. द्वादशवर्षाणि वेद ब्रह्मचर्यम् ।

२. तस्यैतानि व्रतानि भवन्ति ।

३. एता एव देवतास्तपयन्ति ।

४. दशाहं सपिण्डेषु ।

५. कनिष्ठप्रथमा ज्येष्ठजघन्याः ।

६. अग्निमुखा वै देवाः पाणिमुखाः पितरः इति ह ब्राह्मणम् ।

७. जीमूतस्येव भवति प्रतीकमिति कवचं प्रयच्छेत् ।

**III. पञ्च सूत्राणामर्थं लिखत ।** **05x04=20**

१. ऋत्विजो वृत्वा मधुपर्कमाहरेत् ।

२. ब्राह्मणान् भोजयेदित्युक्तम् ।

३. अश्मनस्तेजोऽसि चक्षुर्मे पाहीति चक्षुषी अञ्जयीत ।

४. स्तुहिश्रुतं गर्तसदं युवानमिति मृगस्य ।

५. ग्रामकामा अग्नय इत्युदाहरन्ति ।

६. दधन्यत्र सर्पिरानयन्त्येतत् पित्र्यं पृषदाज्यम् ।

७. अथैतानि पात्राणि योजयेत् ।

**IV. मन्त्रद्वयं पूरयत** **02x05=10**

१. शान्ता पृथिवी.................।।

२. मयि मेधां.....................।।

—०—